# वैयाकरणसिद्धान्तकौमुदी

## स्वादिसन्धिप्रकरणम् (१)

२९.११.२०१०

- ’स्वौजसमौट्...’ इति सुप्रत्यये ’शिवस् अर्च्यः’ इति स्थिते ।
- शिव सुँ अर्च्यः (सु-औ-जस्... – ४.१.२)
- शिव स् अर्च्यः (’उपदेशेऽजनुनासिक इत्’ – १.३.३, ’तस्य लोपः’ – १.३.९)

# १६२. ससजुषो रुः (८.२.६६)

- पदान्तस्य सस्य सजुष्-शब्दस्य च रुः स्यात् ।
- जश्त्वापवादः ।
- शिव रुँ अर्च्यः ('ससजुषो रुः' )
- शिव र् अर्च्यः ('उपदेशेऽजनुनासिक इत्' – १.३.३, 'तस्य लोपः' – १.३.९)

# १६३. अतो रोरप्लुतादप्लुते (६.१.११३)

- चत्वारि पदानि । अतः, रोः, अप्लुताद्, अप्लुते ।
- 'ऋत उत्' (६.१.१११) इत्यतः 'उत्' इति अनुवर्तते ।
- अप्लुताद् अतः – पञ्चमी = अप्लुत-अकारात् परस्य
- रोः – षष्ठी = रोः स्थाने
- अप्लुते अति – सप्तमे = अप्लुत-अकारे परे
- उत् – प्रथमा = उकारः आदेशः स्यात् ।
- अप्लुताद् अतः परस्य रोः उः स्याद् अप्लुते अति ।
- 'भो-भगो-अघो-अपूर्वस्य योऽशि' (८.३.१७) इति प्राप्तस्य यत्वस्य अपवादः ।

- शिव र् अर्च्यः ('ससजुषो रुः' – ८.२.६६)
- शिव उ अर्च्यः ('अतो रोरप्लुतादप्लुते' – ६.१.११३)
- उत्वं प्रति रुत्वस्य असिद्धत्वं तु न भवति, रुत्वम् अनूद्य उत्वविधेः सामर्थ्यात् ।

# १६४. प्रथमयोः पूर्वसवर्णः (६.१.१०२)

- पदद्वयम् ।
- 'इको यणचि' (६.१.७७) इत्यतः 'अचि' इति, 'अकः सवर्णे दीर्घः' (६.१.१०१) इत्यतः 'अकः' इति, 'दीर्घः' इति च अनुवर्तते । 'एकः पूर्वपरयोः' (६.१.८४) इति अधिक्रियते ।
- अकः – पञ्चमी = अक्-वर्णेभ्यः
- प्रथमयोः – षष्ठी = प्रथमा-द्वितीयाविभक्त्यवयवे ('अचि इत्यस्य विशेषणम्)
- अचि – सप्तमी = स्वरे परे
- पूर्वसवर्णः दीर्घः – प्रथमा = पूर्वसवर्णदीर्घः स्यात् ।
- अकः प्रथमाद्वितीययोः अचि परे पूर्वसवर्णदीर्घः एकादेशः स्यात् ।
- इति प्राप्ते ।

# १६५. नादिचि (६.१.१०४)

- पदत्रयम् । न, आद्, इचि ।
- 'प्रथमयोः पूर्वसवर्णः' (६.१.१०२) इत्यतः 'पूर्वसवर्णः' इति अनुवर्तते ।
- आत् – पञ्चमी = अवर्णात्
- इचि – सप्तमी = इच्-वर्णे परे
- पूर्वसवर्णः न = पूर्वसवर्णदीर्घो न भवति ।
- अवर्णाद् इचि परे न पूर्वसवर्णदीर्घः ।

- शिव (सुँ) स् अर्च्यः (स्वौजस्...- ४.१.२)
- शिव (रुँ) र् अर्च्यः (ससजुषो रुः – ८.३.६६)
- शिव उ अर्च्यः (अतो रोरप्लुतादप्लुते – ६.१.११३)
- शिवो अर्च्यः (आद्गुणः – ६.१.८७)
- शिवोऽर्च्यः (एङः पदान्तादति – ६.१.१०९)

- ’अतः’ इति तपरः किम्?
- देवा अत्र
- देव + जस् (स्वौजस्…)
- देव अस् (’चुटू’-१.३.७ इति जकारस्य इत्संज्ञा, ’तस्य लोपः’ -१.३.९)
- देवास् (’प्रथमयोः पूर्वसवर्णः’ – ६.१.१०२ – इति पूर्वसवर्णदीर्घः)
- देवा र् (’ससजुषो रुः’ – ८.३.६६ – इति रुत्वम्)
- देवा र् अत्र

- ’अति’ इति तपरः किम्?
- श्व आगन्ता ।
- श्वस् आगन्ता
- श्व र् आगन्ता

- अप्लुतात् किम्?
- एहि सुस्रोत(३) अत्र स्नाहि
- प्लुतस्य असिद्धत्वाद् अतः परोऽयम् ।
- 'दूराद्धूते च' (८.२.८४) इति प्लुतः विहितः ।
- 'अप्लुतात्' इति विशेषणे तु तत्सामर्थ्यात् न असिद्धत्वम् ।
- तपरकरणस्य तु न सामर्थ्यम्, दीर्घनिवृत्त्या चरितार्थत्वात् ।

'अप्लुते' इति किम्?

तिष्ठतु पय अ(३)ग्निदत्त ।

'गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम्' (८.२.८६) इति प्लुतः ।

# १६६. हशि च (६.१.११४)

- पदद्वयम् ।
- 'अतो रोरप्लुतादप्लुते' (६.१.११३) इत्यतः 'अतः', 'रोः', 'अप्लुतात्' इति, 'ऋत उत्' (६.१.१११) इत्यतः 'उत्' इति च अनुवर्तते ।
- अप्लुताद् अतः परस्य रोः उः स्यात् हशि ।
- शिवर् वन्द्यः = शिव उ वन्द्यः (हशि च)
- शिवो वन्द्यः (आद्गुणः)

- रोः इति उकारानुबन्धग्रहणात् नेह ।
- प्रातर् + अत्र = प्रातरत्र ।
- ’प्रातर्’ इति रेफान्तमव्ययम् ।
- भ्रातर् + गच्छ = भ्रातर्गच्छ ।
- ’भ्रातृ’ इत्यस्य सम्बुद्धौ ऋकारस्य गुणे रपरत्वे ’भ्रातर्’ इति सिध्यति ।

- देव + जस् (अस्) इह
- देवास्  इह(प्रथमयोः पूर्वसवर्णः – ६.१.१०२)
- देवार् इह (ससजुषो रुः – ८.३.६६)

# १६७. भोभगोअघोअपूर्वस्य योऽशि (८.३.१७)

- पदत्रयम् । भो-भगो-अघो-अपूर्वस्य, यः, अशि ।
- 'रोः सुपि' (८.३.१६) इत्यतः 'रोः' इति अनुवर्तते ।
- एतत्पूर्वकस्य रोः यादेशः स्याद् अशि परे ।
- असन्धिः सौत्रः ।

- देवार् इह
- देवाय् इह ('भो-भगो-अघो-अपूर्वस्य योऽशि' – ८.३.१७)
- देवा इह ('लोपः शाकल्यस्य' – ८.३.१९)
- लोपाभावे – देवायिह

- अशि किम्?
- देवास्सन्ति ।
- देवार् सन्ति
- देवाः सन्ति ('खरवसानयोर्विसर्जनीयः' – ८.३.१५)
- देवास् सन्ति ('वा शरि' – ८.३.३६)

- यद्यपि इह यत्वस्य असिद्धत्वात् विसर्गो लभ्यते, तथापि विसर्गस्य स्थानिवद्भावेन रुत्वाद् यत्वं स्यात् ।
- न ह्ययम् अल्विधिः ।
- 'रोः' इति समुदायरूपाश्रयणात् ।